तवं समापित भाष्यो भगवानोचार्योतिपि भगवस्तुतिनति रूप मंगलमाचरति । य इति । श्रीमदानन्दतीक्षीयद्दत्सरोजे व्यवस्तिर्गतः । आनन्दादिगुस्णोदिक्तः प्रीयतां कमलापतिः ।

Colophon :

इति श्रीमदानन्दतीर्थ भगवत्पादाचार्य विरचितस्य तलवकारोपनिषद्भाष्यस्य विवरणं वेदेशभिक्षु विरचितं संपूर्णं । श्रीमत् तल्लवकारोपनिषद्भाष्यं हि यत्कृतं । मध्वेन तस्य या टीका वेदेश रचिता शुभा ।

तां लिलेखपितृस्वान्तगत वासिष्ठतुष्टये ।
आनन्द नाम श्रीव्यासमध्वेशानुग्रहादशं ॥

Acc No. 3696B तीर्थप्रबन्धः

Beginning :

अब्धेस्निग्धोसि सरसे - द्योस्य - सखोप्यसि ।
मुर्खेरनेकैर्यो गंगासुखान्या चुंब्यजंभसे ॥
जगन्नाथो विजयते जगतामर्चितः सदा ।
ज्ञानख्यरभ्यफलर्शोर्यदा स्त्रजगुणागमः ॥

श्रीपर्वत कृतावासो भातिशो मल्लिकार्जुनः ।
बद्ध स्वीय जटाजूट मध्य, - चन्द्रमाः ।

Ending :

द्दद्भ्रभारदैतेयकृति विश्वजनावन ।
शाङ्ग्रपाणेशरणांते लक्ष्यं पापानिमेधुन ॥

Colophon :

इति श्रीवादिराज पूज्यचरण विरचिते तीर्थप्रबंधे पूर्वप्रबंधः समाप्तः ।

Acc No. 3502 तीर्थप्रबन्धटीका गुरुभावप्रकाशिका

Ending :

लेशः अल्पो भार्वेगः अनेकावतोपकया रूपः अनुवर्णितः स्वशक्तयानु सारेण वर्णितः तत्तद्दैवर्णानकौलं सञ्चरितः शोभनव्दरितोनारायणो भवान् । चित्ते स्वचित्तं प्रर्च्यस्थापदता । अंगीकृतेप्यर्थः । प्रीयतां प्रीतो भावेत् । प्रीङ् प्राणान इत्यस्माध्रातोलेदि -

Colophon :

इति श्रीमत्कविकुलतिलक वादिराज पूज्यचरण विरचितस्य तीर्थ प्रबन्धस्य टीकायां लक्ष्मीपति भट्टोपाध्यायसूनु नारायणाचार्य कृतायां गुरु भावप्रकाशिकायां उत्तर प्रबंधः समाप्तः ।

मन्मथ नाम संवत्सरे दक्षिणायने हिमन्तॠतौ मार्गसिमासे कृष्णपक्षे त्रितीययां सौम्य वासरे पुष्य नक्षत्रे शुभयोग शुभकर्णे माध्यान्तकाले सगरनगेरे उत्तरप्रबंधं समाप्तः ।

Acc No. 3730C तैत्तिरीयोपनिषत् खण्डार्थ वा भाष्यार्थसंग्रहः

Beginning :

श्रीब्रह्मशेषरुद्रादिदैवतैः सर्ववेदगैः ।
वचोभिरीडितं विष्णुं नानारूपमुपास्महे ॥
प्रणम्य श्रीमदानन्दतीर्थादिगुरुशेखरान् ।
तैत्तिरीयोपनिषदः करिष्याम्यत्र संग्रहम् ॥

भाष्यस्यों व्यासतीर्थ टीकातोद्यवगम्यते ।
विक्षिप्तत्वादुपनिषदर्थस्यैवात्र संग्रहः ॥
अस्या उपनिषदः रविमण्डलगो विष्णुः ब्रह्मा वरुणो भृगुश्चेति क्रमादृषयश्चत्वारः ॥

Ending :
य एवं वेद सम्यग्जानाति विरिंचिः स एव मुख्य ज्ञानी एवं सामगायन्नास्ते इति पूर्वेणान्वयः इति एवं प्रकारेण उपनिषद्रहस्य मुक्तमित्युपसंहारः ।

Colophon :
तैत्तिरीयोपनिषदो भाष्याद्युक्तार्थसंग्रहः ।
राघवेन्द्रेण यतिना कृतस्सज्जनसंविदे ॥

Acc No. 3478 तैत्तिरीयोपनिषद्भाष्यम्

Ending :
पूर्णागण्यगुणोदारधाम्ने नित्याय वेधसे ।
अमन्दानन्दसान्द्राय प्रेयसे विष्णवे नमः ॥

Colophon :
इति श्रीमदानन्दतीर्थभगवत्पादविरचिते श्रीतैत्तिरीयोपनिषद्भाष्ये भृगुवल्ली समाप्ता ।

Acc No. 4786 तैत्तिरीयोपनिषद्भाष्यम्

Beginning :
सत्यं ज्ञानमनन्तमानन्दं ब्रह्म सर्वशक्तयेकम् ।
सर्वैर्वैवैरीड्यं विष्णवाख्यं सर्वदैमि सुप्रेष्ठम् ॥
आदित्यसंस्थिताद् विष्णोः श्रुत्वा ब्रह्मा यथा हरिम् । तुष्टाव तत्प्रकारेण वरुणोक्तेन वै भृगुः । विष्णुमस्तौत् तथा प्राह शन्नोमित्रादिका श्रुतिः ।

Ending :
आसमन्तात् पतित्वे तु गूढं कलियुगे हरिम् ।

Acc No. 4799 तैत्तिरीयोपनिषद्भाष्यम्

Beginning :

सत्यं ज्ञानमनन्तमानन्दं ब्रह्म सर्वशक्तयेकम् ।
सर्वैर्वेवैरीड्यं विष्ण्वाख्यं सर्वदैमि सुप्रेष्ठम् ।।

आदित्यसंस्थिताद् विष्णोः श्रुत्वा ब्रह्मा यथा हरिम् । तुष्टाव तत्प्रकारेण वरुणोक्तेन वै भृगुः । विष्णुमस्तौत् तथा प्राह शन्नोमित्रादिका श्रुतिः ।

Ending :

पूर्णागण्यगुणोदारधाम्ने नित्याय वेधसे ।
अमन्दानन्दसान्द्राय प्रेयसे विष्णवे नमः ।।

Acc No. 4801 तैत्तिरीयोपनिषद्भाष्यटीका

Beginning :

ज्ञानानन्द मुखैः सर्वैर्गुर्णेरर्णवमिष्टदं ।
गुर्वाराधित पादाब्जं भजेहं बादरायणं ।।
श्रीमदानन्दतीर्थाय चरणौ प्रणमाम्यहं ।
रुद्रादि सर्व विबुर्धेः संसेव्याविष्टदौ सतां ।।
श्रुतिक्षीराब्धि मामय्यधीमंदिरमहीभृता ।
प्राप्तान्यायसुधायेनतं जयेन्द्रमहं भजे ।।
येन वेदान्त भाष्याणि विवृतानि महात्मना ।
तं वन्दे व्यासतीर्थख्यं जयराजनिषेवकं ।।
विद्याद्धिराजेन्द्र मुनींस्तथा वेदेशयोगिनः ।
छांदोग्य भाष्य सट्टीका कर्तृन्वंदे निरंतरं ।।
श्रीमध्वशास्त्रं समुदीयं येस्मिन् विश्वासहेतोः समदर्शयंन्ये ।
प्रदानसूत्रप्रतिपाद्यभावं वन्दे गुरुस्तान्य दुवर्य संज्ञान् ।।
अर्येतेत्कृपया श्रीनिवासाख्ययुत सूरिणा ।
तैत्तिरीयोपनिषदः भाष्यं व्याक्रियते मया ।।

Ending :

तैत्तिरीयोपनिषदो भाष्यस्य विवृतिस्तियं । पदर्थ दीपिकाह्बास्या संप्रीत्यै कृष्ण मध्वयोः वेदेशतीर्थीय सुपाद भक्त श्रीयादवाचार्य गुरूपदिष्टः । अर्थोनिबधोत्र विचार्य सद्भिः आयैरुपेक्ष्यो न भवेदतोयं ।

Colophon :

इति श्रीमदानन्दतीर्थ भगवत्पादाचार्य विरचितस्य श्रीमत्तैत्तिरीयोपनिषद्भाष्यटीकायां श्रीमद्यदुपत्याचार्य पूज्यपादाराधकेन श्रीनिवासेन विरचितायां पदार्थदीपिकायां भृगुवल्ली समाप्ता ।

श्रीमद्हनुमभीममध्वांतर्गत श्रीमदस्मद्गुर्वंतर्गतरामकृष्ण वेदव्यासप्रियतां ।

Scribe :

प्रमादि संवत्सर पुष्य कृष्ण दशमीगुरुवासरेकाशीसुबेनं समाप्तिमगमत् ।

Acc No. 4759 दशप्रकरणमूल

Ending :

मामै वैष्यसिसयुंने प्रतिजाने प्रियोसिमे । विज्ञानमांनंदं ब्रह्मरातिर्दातुः परायणं । निष्टमानस्य तद्विद् इष्टादि श्रुतिस्मृतिभ्यः । नमो नारायणायाजभवशक्रोष्टणुरुङ्मुखैः । सदार्वंदित पादाब्ज युग्माय पेयसेधिकं ।

Colophon :

इति श्रीमदानन्दतीर्थ भगवत्पादाचार्य विरचित कर्मानिर्णयः समाप्तः ।

श्रीदशप्रकरणमूलः समाप्तः ।

Acc No. 3818 दशावतारस्तुतिटीका

Beginning :

संबोधनं । श्रीशेति । अजरामान्ता जराच आमंरोगश्च अन्तो नाशश्च जरामान्ताः अजाद्यन्तमिति तनु भवति तस्यानित्यत्वात् न विद्यते तेयस्यसोजरामान्त । वार्द्धक्ययरोग नाश शून्य इत्यर्थः सर्वत्र संबुध्यान्वयोद्रष्टव्यः ।

Ending :

रचितामित्यशेषमतिमंगलां - कोनेरिबुधवर्येण कृताः श्लोक वरामया । तस्यानुजेनरामेण व्याख्यातास्ते महामुदे ।

Colophon :

इति श्रीमत्सागर वेंकटेश पंडिताचार्य पुत्र कोनेर्याचार्यकृत समुद्भयमक दशावतारस्तुति टीका रामाचार्य कृता संपूर्णा ।

Acc No. 2838 **द्वादशस्तोत्रम्**

Beginning :

वन्दे वन्द्यं सदानन्दं वासुदेवं निरञ्जनम् ।
इन्दिरापति माद्यादिवरदेश वर प्रदम् । (२-१)

Ending :

वृन्दारवृन्सुबन्दित वन्दे ।
आनन्द...................... ।

Acc No. 3821 **द्वादशस्तोत्रटीका**

Beginning :

उत्पत्तिस्थितिसंहृतिप्रणयति ज्ञानानि बन्धावृतिः ।
मोक्षश्चेति यतो भवन्ति जगतो भावाः स्वतन्त्रात्परात् ।
तं वन्दे निरवद्यसद्गुणतनुं लक्ष्मीधरालिङ्गितं ।
दोर्भिश्चकदराम्बुजाभयभृतं भक्तयेकगम्यं हरिः ॥
प्रणम्य श्रीमदानन्दतीर्थार्थ चरणाश्रितान् ।
गुरुन्व्याकरवै विष्णोः प्रीतये द्वादशस्तुतिः ॥

Ending :

क्वानन्दतीर्थयोगीन्द्र वचो देवैस्सुदुर्विशः ।
काहमल्पमतिः कृष्णानुग्रहः साधयेन्न किम् ॥

Colophon :

इति श्रीमदानन्दतीर्थ भगवत्पादाचार्य विरचित द्वादशस्तोत्रं संपूर्णं ।

Scribe :

आंगिरस संवत्सरे उत्तरायणे वसंतऋतौ चैत्रमासे शुक्लपक्षे तृतीयां स्थिरवासरे इदं पुस्तकं संपूर्णम् , माविनकुरुवेसातयेनलिखितं ।

Acc No. 2768 **न्यासविवरणटीका (भावोद्धारः)**

Beginning :

प्तिरिक्तत्कं भवति । एवं जडत्वादि हेतोरादिकालीनमृदादि रूप पक्ष धर्मत्वं च द्रष्टव्यं । (२-१)

Ending :

विशेष श्रुतिमात्रादिति योजना एवं च सामान्य श्रुति साहित्येन प्रबल स्पष्टार्थवद्विशेष श्रुता प्राणोत्पत्ति सिद्धेः युक्तमीश्वरस्य (२-४)

Colophon :

इति श्रीमद्रघुवर्यतीर्थ पूज्यपादशिष्य रघूत्तम यतिकृते श्रामज्जयतीर्थ श्रीचरणप्रदर्शिते तत्त्वप्रकाशगतन्यायविवरण भावोद्धारे द्वितीयायस्य तृतीयपादः ।

Acc No. 2826 न्यायविवरणटीका भावोद्धारः

Beginning :

गुणादि सद्रत्नयुतं क्षयादिदोषो झितं वेदनदीभिराप्यम् ।
कृपाजलं श्रीहरि वारि राशि श्रयेस्वपादप्लवमुक्तगग्यम् ॥
सुशास्त्र प्रभया स्वस्यपरेषां - प्रकाशकं ।
भजतामिष्टदं व्यासंचिंतामणिमहं भजे ॥
वेदभेद विविधोस्सुशाखं बोध पूर्वक गुणाद्यफलेतं ।
आदरेण भजतां फल प्रदंमोदतीर्थ सुरभूस्हमीड ।
सुगुण नरहरि श्री माधवाक्षोभ्य स्पान्हरि भजन ।
नियुक्तां धर्मार्थ कामान् । सुजन निमयेनार्थ यः ।
प्रसाध्याय भोक्षं सभवतु मम भूत्यैपद्यनाभाख्य
योगी ॥

Colophon :

इति श्रीमद्रघुवर्य पूज्यपादशिष्य रघूत्तमयति कृते श्रीमज्जयतीर्थ श्रीचरणप्रदर्शित तत्त्वप्रकाशगतन्यायविवरण भावोद्धारे प्रथमाहयायस्य चतुर्थः पादः ।

Acc No. 4683 न्यायसुधा

Ending :

इति श्री मत्पूर्वपमति भगवत्पाद सुकृते रनुव्याख्यानस्य प्रगुणो जयतीर्थाख्येनयतिना । कृतायां टीकायां विषमपद वाक्यार्थ विवृतौ द्वितीयेध्यायेस्मिश्चरमचरणः पर्यवसिनः ।

Colophon :

इति श्री मन्नयासुधायां द्वितीयाद्ध्यायस्य चतुर्थपादः समाप्तः ईश्वर नाम संवत्सरे अधिकज्येष्ट कृष्ण सप्तम्यां भानुवासरे तृतीययाम समाप्तिमगमत् ।

Acc No. 4684 न्यायसुधा

Beginning :

कुपिताहिफणच्छायासमीकृत्यापरं सुखम् ।
सेहन्ते यत्पदं धीरास्तं भजे वल्लभं श्रियः ॥

साधनविचरो अयमध्यायः । वैराग्यार्थे गत्यादिनिरूपणा प्रथमपाद इत्यध्यायपादप्रतिपाद्यं भाष्य एव स्फुटम् । सङ्गतिं तु लाघवायैकीकृत्योपरि वक्ष्याम इत्याशयवांस्तृतीया(ध्याय)द्यपादाधिकरणपूर्वपक्षसिद्धान्तयुक्तीः संग्रहेणाह स्वाभाविकेति ।

Ending :

प्रारब्धस्य कर्मणो अविरोधेनैव ज्ञानं दृष्टफलं प्रोक्तमिति प्रथमाधिकरणतात्पर्यम् । दृष्टं च तत्फलं चेति दृष्टफलम् । श्रवणादिसम्पूर्त्यनन्तरमेव ज्ञानमुत्पद्यते । यदि प्रारब्धकर्मप्रतिबन्धकं नास्ति । तस्मिंस्तु लति तदवसान इति । एवमेव मुक्तिश्चैवेह लभ्यत इति द्वितीयस्य । यस्मिन्देहे ज्ञानसुत्पन्नं तत्पातानन्तरमेव मुक्तिर्लभ्यते प्रारब्धकर्मप्रतिब(न्धाभावे)न्धकाभावे । तद्भावे तु तदवसान इति ॥

Colophon :

इति श्री मत्पूर्णप्रमतिभगवत्पादसुकृतेरनुव्याख्यानस्य प्रगुणजयतीर्थाख्ययतिना ॥ कृतायां टीकायां विषमपदवाक्यार्थविवृतौ तृतीयाध्याये अस्मिंश्चरमचरणः पर्यवसितः ॥

Acc No. 4685 न्यायसुधा

Beginning :

यदीयचरणां भोजच्छायामाश्रित्य निर्वृताः ।
नंदंति सततं मुक्ताः संश्रये तं श्रियः पतिं ॥

फलं निगद्यतेऽस्मिन्नध्याय इति भाष्यं । फलनिरूपणस्येदीं का संगतिरित्यत आह समन्वयेति ।

Ending :

अनुव्याख्यामृताम्भोधेः समुत्पन्नातिनिर्मला ।
इयं न्यायसुधा भौमैर्विबुधैः सेव्यतां सदा ॥

Colophon :

इति श्री मत्पूर्णप्रमतिभगवत्पादसुकृतेरनुव्याख्यानस्य प्रगुणजयतीर्थाख्ययतिना । कृतायां टीकायां विषमपदवाक्यार्थविवृतौ चतुर्थे अध्याये अस्मिंश्चरमचरणः पर्यवसितः ।

Acc No. 4686 **न्यायसुधा**

Beginning :

श्रियः पत्ये नित्यागणितगुणमाणिक्यविशद
प्रभाजालोल्लासोपहतसकलावद्यतमसे ।
जगज्जन्मस्थेमप्रलयरचनाशीलवपुषे
नमोऽशेषाम्नायस्मृतिहृदयदीप्ताय हरये ॥

Acc No. 3464 **न्यायसुधाटिप्पणी**

Beginning :

सुखमुखगुणबिम्बः साधुमार्गावलम्बः
सुमतिजलजमोदो दूषितान्यप्रमोदः ।
भुवनविततमोहध्वान्तविध्वंसकेहो दिशतु
दृशमभीष्टां व्याससूर्यः स्वनिष्ठाम् ॥
पूर्णप्रज्ञजयार्यपूर्वकगुरूनानम्य विद्याप्रदान्
वेदेशाभियोगिनोऽपि कृपया तेषां सुधाटिप्पणीम् ।
बालानां तनुते मितां यदुपतिर्बोधाय धीशुद्धये
स्वस्यापि प्रविचिन्त्य सद्गुरुमुखात्सम्यक् श्रुतार्थान्मुहुः ॥

Ending :

विशेष श्रुतिमात्रादिति योजना एवं च सामान्य श्रुति साहित्येन प्रबल स्पष्टार्थवद्विशेष श्रुता प्राणोत्पत्ति सिद्धेः युक्तमीश्वरस्य (२-४)

Colophon :

इति श्रामद्रधुवर्यतीर्थ पूज्यपादशिष्य रघूत्तम यतिकृते श्रामज्जयतीर्थ श्रीचरणप्रदर्शिते तत्वप्रकाशगतन्यायविवरण भावोद्धारे द्वितीयायस्य तृतीयपादः ।

Acc No. 3487 न्यायसुधाटिप्पणी

Ending :

अपारागाधश्रीजयगुनिकृतग्रन्थहृदयप्रपञ्चे मे यत्नो यदपि परिहासैकफलकः । तथापि श्रीव्यासालवमतिकृपादृष्टिबलतः कृतो यत्तेन स्यात्सकलसुजनाल्हादजनकः । वेदेशयोगिवरमानसनीरजस्थ-श्रीमध्वहृत्कमलवासिरमानिवासः । व्यासोस्त्वनेन जयतीर्थमुनीन्द्रवाक्यगूढाशयप्रकटनेन सदा विभूत्यै ॥

Colophon :

इति श्री मद्यदुपत्याचार्यपूज्यपादाराधकेन श्रीनिवासेन विरचिते टीकाऽधृतसुधावाक्यार्थविवरणे चतुर्थाध्यायस्य चतुर्थः पादः समाप्तः ।

Acc No. 4678 न्यायसुधाटिप्पणी

Beginning :

वेदव्यासं गुणावासं पुर्णबोवान्मुनीनपि ।
वन्देऽहं जयतीर्थार्यांस्तथा वेदेशयोगिनः ।

वेदेशमुनिसत्पादसेवासंप्राप्तवैभवान् । यादवार्यान् न्यायसुघाटीकाकाानहं भजे तत्पादाराधकश्रीनिवासेन तदनुग्रहात् । टीकागृहीतवाक्यार्थविवृतिः क्रियते मया ग्रन्थादौ श्रीपतिनमनरूपं मङ्गलमाचरति ॥ श्रियः पत्य इति ।

Acc No. 4679 न्यायसुधाटिप्पणी

Beginning :

सुखमुखगुणबिम्बः साधुमार्गावलम्बः
सुमतिजलजमोदो दूषितान्यप्रमोदः ।
भुवनविततमोहध्वान्तविध्वंसकेहो दिशतु
दृशमभीष्टां व्याससूर्यः स्वनिष्ठाम् ॥

पूर्णप्रज्ञजयार्यपूर्वकगुरूनानम्य विद्याप्रदान्
वेदेशाभियोगिनोऽपि कृपया तेषां सुधाटिप्पणीम् ।
बालानां तनुते मितां यदुपतिर्बोधाय धीशुद्धये
स्वस्यापि प्रविचिन्त्य सद्गुरुमुखात्सम्यक् श्रुतार्थान्मुहुः ॥

Ending :

विशेष श्रुतिमात्रादिति योजना एवं च सामान्य श्रुति साहित्येन प्रबल स्पष्टार्थवद्विशेष श्रुता प्राणोत्पत्ति सिद्धेः युक्तमीश्वरस्य (२-४)

Colophon :

इति श्रामद्रधुवर्यतीर्थ पूज्यपादशिष्य रघूत्तम यतिकृते श्रामज्जयतीर्थ श्रीचरणप्रदर्शिते तत्वप्रकाशगतन्यायविवरण भावोद्धारे द्वितीयायस्य तृतीयपादः ।

Acc No. 4846 न्यायसुधाटिप्पणी तात्पर्यचन्द्रिका

Beginning :

नित्यागण्यबलद्युतिप्रमितिसत्सौख्याग्यवीर्यातुलौ
दार्यप्राभवधीरतामुखगुणव्रातात्मदिव्याकृतिम् ।
सन्तापादिसमस्तदोषविधुरं वेदैकवेद्यं जग-
ज्जन्मादिप्रदमिन्दिरेश(ममलं)मनिशं नारायणं नौम्यहम् ॥

वेदाम्भोधिसमुद्भतातिविलसत्सूत्रामृताम्भोलसद्धारावर्षणतुष्टसद्धदवनिज्ञानाङ्कुराधायकम् । संसारातपनाशनं सुरमनः सञ्जातकानन्ददं वेदव्यासविचित्रमेघमनिशं मच्छ्रेयसे संश्रये ॥

Acc No. 2812 न्यायामृतमाधुरी

Beginning :

गुणान् प्लुषाणात्मनिदोषजातं
विषाण चेतां सिमुषाणयः सतां ।
पुषाणविंदू नितितिकात्करोति
प्रतीषयन् श्रीशमुपाश्रयेतम् ॥

Ending :

ब्रह्मानं देनापितस्मादित्यस्य वादि प्रतिवादिनो रन्यैषी च सभास्यानं निश्चयवता मुपैत्र्येवावतोरितत्वात् । नापिस्व कर्तव्येत्यस्य अनुमानमणि दीधिति । अनुमिति ग्रंथे अनुभव स्यस्ष्ट । ......न क तानवच्छेदकत्व विवेचन प्रस्थावना द्यनुभवत्वेन तथोत्वं संस्कारस्य फलनांश्य ।

Acc No. 3687B न्यायमृतव्याख्या तात्पर्यचन्द्रिका

Beginning :

द्योतयंतं दश दिशो भासासूर्यसमानया ।
बुद्धिमंतं दयावंतं हनुमंतमुपास्महे ।
तात्पर्य चद्रिकायुक्तं न्यायामृतकलानिधिं ।
तकोडि तान्डवंकृतं व्यासतीर्थमहंभजे ।

अथातो ब्रह्मजिज्ञासेति न्याय ग्रथनात्मक ब्रह्ममीमांसा शास्तादिम सूत्रस्योकारः ।

Acc No. 3488 पञ्चरत्नस्तबकः

Beginning :

नखाग्रलीलाविन्यासविदारित
आकण्ठमानुषं देवं आश्रयामः श्रियः पदम् ॥

Ending :

अवच्छेदवाक्यानां भूयस्त्वेन तदनुग्रहस्यैव न्याय्यत्वाच्च सुखस्य जीवादिसाधारण्ये तस्य ब्रह्मलक्षणत्वानुपपत्तेरिति सङ्क्षेपः ॥

श्रीमदानन्दतीर्थेष्ट्श्रीनृसिह्मप्रदाब्जयोः ।
स्तबकपञ्चरत्न न्यस्तो गोविन्दसूरिणा ॥

Colophon :

इति श्रीमन्गोविन्द विबुध विरचित पञ्चरत्नस्तबकः संपूर्तिमगमतु ।

Acc No. 3491 प्रपंचमिथ्यात्वानुमानखण्डनटीका

Beginning :

नत्वा विश्वोदयस्थेमलयहेतुं पतिं श्रियः ।
कुर्मः प्रपञ्चमिथ्यात्वामानखण्डनपञ्चिकाम् ॥

जन्माद्यस्य इति भगवता सूत्रकारेण जगदुदयादिनिमित्तकारणत्वं परस्य ब्रह्मणो लक्षणमभिहितम्।

Acc No. 4761 प्रपंयमिथ्यात्वानुमान खंडनविवरण

Beginning :

नत्वा विश्वोदयस्थेमलयहेतुं पतिं श्रियः।
कुर्मः प्रपञ्चमिथ्यात्वामानखण्डनपञ्चिकाम् ॥

जन्माद्यस्य इति भगवता सूत्रकारेण जगदुदयादिनिमित्तकारणत्वं परस्य ब्रह्मणो लक्षणमभिहितम्।

Ending :

उत्पत्तिस्थितिभङ्गं विश्वं यस्मात् प्रपद्यते पुरुषात्।
सजयति जगतामन्तर्यामी स्वामी रमानाथः ॥

Colophon :

इति श्रीमदानन्दतीर्थभगवत्पादाचार्य विरचितप्रपञ्चमिथ्यात्वानुमानखण्डनविवरणं जयतीर्थभिक्षुविरचितं समाप्तम् ॥

Acc No. 3492 प्रपञ्चमिथ्यात्वानुमानखंडनपञ्चिका व्याख्या

Beginning :

श्रीरामं हनुमंत सेव्यं श्रीकृष्णं भीम सेवितम्।
श्रीव्यासं श्रीमदानंदतीर्थ संसेवितं भजे ॥

सर्वज्ञ कल्पाः टीकाकाराः जयतीर्थ श्रीमच्चरणाः प्रपञ्चमित्यात्वानुमान खंडनाख्यं प्रकरण व्याख्यातुकामाः प्रतिज्ञानीते। नत्वेति।

Ending :

श्रीमध्वकृत सिद्धान्तयोयं...... स्वेहतोमयि।
तं वंदे यादवाचार्य गुरुं शिष्यकृपानिधि ॥

Colophon :

इति श्रीमध्यदुत्पत्याचार्य पूज्यपादाराधक श्रीनिवासेन विरचिता प्रपञ्चमिथ्यात्वानुमान खंडने पञ्चिकाव्याख्या समाप्तम् ॥

Acc No. 3486 **प्रमाण पद्धतिः**

Beginning :

प्रणम्य चरणाम्भोजयुगलं कमलापतेः ।
प्रमाणपद्धतिं कुर्मो बालानां बोधसिद्धये ॥

यद्यपि भगवत्पादैरेव प्रमाणलक्षणादिकमभिहितम् । तथापि गम्भी रया वाचा विक्षिप्य वर्णितम् । न मन्दैः सुखेन शक्यते बोद्धुमिति तदर्थमिदं प्रकरणमारभ्यते -

Acc No. 4752 **प्रमाण पद्धतिः**

Beginning :

प्रणम्य चरणाम्भोजयुगलं कमलापतेः ।
प्रमाणपद्धतिं कुर्मो बालानां बोधसिद्धये ॥

यद्यपि भगवत्पादैरेव प्रमाणलक्षणादिकमभिहितम् । तथापि गम्भी रया वाचा विक्षिप्य वर्णितम् । न मन्दैः सुखेन शक्यते बोद्धुमिति तदर्थमिदं प्रकरणमारभ्यते -

Acc No. 2827A **प्रातः सङ्कल्पगद्यम्**

Beginning :

लौकिकवैदिकश्चेदश्चिन्नवर्णात्मकध्वन्यात्मकाशेषशब्दार्थऋगादिसर्वदार्थविष्णुमंत्रार्थपुरुष-सूक्तार्थगायत्र्यर्थवासुदेवद्वादशाक्षरमंत्रांतर्गताद्याष्टाक्षरार्थश्रीमन्नारायणाष्टाक्षरमंत्रार्थवासुदेवद्वादशाक्षर-मंत्रांतर्गतांत्यचतुरक्षरार्थव्यात्द्वृत्यर्थमातृकामंत्रार्थप्रणवोपासकानां ।

Ending :

यथाशक्तियथाज्ञप्तियथावैभवंकरिष्येमदाज्ञाकारिभिर्विद्यासंबंधिभिर्देहसंबंधिभिश्चत्वदीयैर-शेषजनैस्त्वत्सर्वकर्तृत्वकारयित्तृत्वाद्यनुसंधानपूर्वकंकारयिष्येच ॥ इति श्रीराघवेंद्राख्य यतिनाकृतमंजसा ॥ प्रातः संकल्पगद्यंस्यात्प्रीत्यैमाधवमध्वयोः ॥

Colophon :

इति श्रीमद्राघवेन्द्रयति शिरोमणिभिर्विरचित प्रातःसंकल्पगद्यं समाप्तम् ॥

Acc No. 4783 बृहदारण्यकोपनिषद्भाष्यम्

Beginning :

ॐ ॥

प्राणादेरीशितारं परमसुखनिधिं सर्वदोषव्यपेतं
सर्वान्तस्थं सुपूर्णं प्रकृतिपतिमजं सर्वबाह्यं सुनित्यम् ।
सर्वज्ञं सर्वशक्तिं सुरमुनिमनुजाद्यैः सदा सेव्यमानं
विष्णुं वन्दे सदाऽहं सकलजगदनाद्यन्तमानन्ददं तम् ॥

"यथा तुष्टाव लक्ष्मीशं सर्गादौ चतुराननः । तथा जगाद सूर्याय याज्ञवल्क्याय सोऽब्रवीत् । वाजिरूपेण सूर्येण प्रोक्तं वाजसनेयकम् । कण्वाय याज्ञवाल्क्योदात् काण्वं तेन प्रकीर्तितम्" इति वाराहे । "अश्वस्वरूपो ब्रह्माभूदश्वरूपाज्जनार्दनात् । तत्र सन्निहितो विष्णुरश्वरूपः स्वयं प्रभुः । तयोश्च प्रतिमा मेध्यो यतोश्वोयं श्रुतौ श्रुतः । सर्वं जगत् तदङ्गेषु तस्मात् सन्निहितं श्रुतम् । तयोरङ्गेष्विदं यस्माज्जगत् सर्वं प्रतिष्ठितम्" इति प्रध्याने ।

Ending :

प्रज्ञा प्रमतिरुद्दिष्टा पूर्णप्रज्ञस्ततः स्मतः । आ समन्तात् पतित्वे तु गूढं रलिंयुगे हरिम् । असत्यमप्रतिष्ठं तज्जगदेतदनीश्वरम् । वदद्भिर्गूहितं सन्तं तृतीयोसुर्मथायति । येन विष्णोस्तु वर्पाख्यान् गुणानज्ञासिषुः परान् । ईशानास्ते सूरयश्च निगूढान् निर्गुणोक्तिभिः । त्रेतायां द्वापरे चैव कलौ चैते क्रमात् त्रयः । एतेषां परमो विणुर्नेता सर्वेश्वरेश्वरः । स्वयम्भुब्रह्मसंज्ञोऽसौ परोऽस्मै ब्रह्मणे नमः ।

Colophon :

इति श्रीमदानन्दतीर्थभगवत्पादविरचिते श्रीमद्बृहदारण्यकोपनिषद्भाष्ये अष्टमोध्यायः समाप्तम् ॥

Acc No. 3469 बृहदारण्यक भाष्यटीका

Beginning :

प्रथमायाः पंचमी तृतीयार्थत्वे एष आदीनां शिर आदि जातत्वं । षष्ट्यर्थत्वे षत्व चतुर्त्यत्वे चाद्यर्थं...... योग्यार्यतेत्यर्थः ।

Ending :

न च साक्षि बेद्यत्वे...... नवस्थापातः ।

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

Acc No. 2845 ब्रह्मसूत्राणुभाष्यम्

Beginning :

नारायणं गुणैस्सर्वैरुदीर्णं दोषवर्जितम् ।
ज्ञेयं गम्यं गुरूंश्चापि नत्वा सूत्रार्थ उच्यते ॥
विष्णुरेव विजिज्ञास्यः सर्वकर्तागमोदितः ।
समन्वयादीक्षितेश्च पूर्णानन्दोन्तरः खवत् ॥

Ending :

पूर्णप्रज्ञेन मुनिना सर्वशास्त्रार्थसंग्रहः ।
कृतोऽयं प्रीयतां तेन परमात्मा रमापतिः ॥
नमो नमोशेषदोषदूरपूर्णगुणात्मने ।
विरिञ्चिशर्वपूर्वेड्यवन्द्यायं श्रीवराय ते ॥

Colophon :

इति श्रीमत्कृष्णद्वैपायनकृतब्रह्मसूत्राणुभाष्ये श्रीमदानन्दतीर्थविरचिते चतुर्थोध्यायः समाप्तम् ॥

Acc No. 4674 ब्रह्मसूत्रानुव्याख्यान

Beginning :

ॐ ॥

नारायणं निखिलपूर्णगुणैकदेहं
निर्दोषमाप्यतममप्यखिलैः सुवाक्यैः ।
अस्योद्भवादिदमशेषविशेषतोपि
वन्द्यं सदा प्रियतयं मम सन्नमामि ॥
तमेव शास्त्रप्रभवं प्रणम्य जगद्गुरूणां गुरुमञ्जसैव ।
विशेषतो मे परमाख्यविद्याव्याख्यां करोम्यन्वपिचाहमेव ॥

प्रादुर्भूतो हरिर्व्यासो विरिञ्चिभवपूर्वकैः । अर्थितः परविद्याख्यं चक्रे शास्त्रमनुत्तमम् ॥ गुरुर्गुरूणां प्रभवः शास्त्राणां बादरायणः । यतस्तदुदितं मानमजादिभ्यस्तदर्थतः ॥ वक्तृश्रोतृप्रसक्तीनां यदाप्तिरनुकूलता । आप्तवाक्यतया तेन श्रुतिमूलतया तथा ॥

Ending :

नमो नमोशेषविशेषपूर्णगुणैकधाम्ने पुरुषोत्तमाय ।
भक्तानुकम्पादतिशुद्धसंविद्दात्रेनुपाधिप्रियसद्गुणात्मने ॥
यस्य त्रीण्युदितानि वेदवचने रूपाणि दिव्यान्यलं
बट् तद् दर्शतमित्थमेव निहितं देवस्य भर्गो महत् ।
वायो रामवचोनयं प्रथमकं पृक्षो द्वितीयं वपु-
र्मध्वो यत्तु तृतीयमेतदमुना ग्रन्थः कृतः केशवे ॥
निश्शेषदोषरहित कल्याणाखिलसद्गुण ।
भूतिस्वयम्भुशर्वादिवन्द्यं त्वां नौमि मे प्रियम् ॥

Colophon :

इति श्रीमदानन्दतीर्थभगवत्पादविरचिते श्रीमद्ब्रह्मसूत्रानुव्याख्याने चतुर्थोध्यायः समाप्तम् ॥

Acc No. 4681 **ब्रह्मसूत्रानुव्याख्यान**

Beginning :

ॐ ॥

नारायणं निखिलपूर्णगुणैकदेहं
निर्दोषमाप्यतममप्यखिलैः सुवाक्यैः ।
अस्योद्भवादिदमशेषविशेषतोऽपि
वन्द्यं सदा प्रियतयं मम सन्नमामि ॥
तमेव शास्त्रप्रभवं प्रणम्य जगद्गुरूणां गुरुमञ्जसैव ।
विशेषतो मे परमाख्यविद्याव्याख्यां करोम्यन्वपिचाहमेव ॥

प्रादुर्भूतो हरिर्व्यासो विरिञ्चभवपूर्वकैः । अर्थितः परविद्याख्यं चक्रे शास्त्रमनुत्तमम् ॥ गुरुर्गुरूणां प्रभवः शास्त्राणां बादरायणः । यतस्तदुदितं मानमजादिभ्यस्तदर्थतः ॥ वक्तृश्रोतृप्रसक्तीनां यदाप्तिरनुकूलता । आप्तवाक्यतया तेन श्रुतिमूलतया तथा ॥

Ending :

नमो नमोशेषविशेषपूर्णगुणैकधाम्ने पुरुषोत्तमाय ।
भक्तानुकम्पादतिशुद्धसंविद्दात्रेनुपाधिप्रियसद्गुणात्मने ॥

यस्य त्रीण्युदितानि वेदवचने रूपाणि दिव्यान्यलं
बट् तद् दर्शतमित्थमेव निहितं देवस्य भर्गो महत् ।
वायो रामवचोनयं प्रथमकं पृक्षो द्वितीयं वपु-
र्मध्वो यत्तु तृतीयमेतदमुना ग्रन्थः कृतः केशवे ॥

Colophon :

इति श्रीमदानन्दतीर्थभगवत्पादविरचिते श्रीमद्ब्रह्मसूत्रानुव्याख्याने चतुर्थोध्यायः समाप्तम् ॥

Acc No. 516 **ब्रह्मसूत्रभाष्यम्**

Beginning :

नारायणं गुणैस्सर्वैरुदीर्णं दोषवर्जितम् ।
व्यासोदितान् गुरूंश्चापि नत्वा सूत्रार्थ उच्यते ॥

Ending :

यस्य त्रीयुदितानि......
...... देवस्य भर्गो ।
वायो...... प्रमयकं पक्षोद्वितीयं वपुः
मध्वो यत्तु तृतीयकं भाष्यं हरौ तेनहि ॥

Colophon :

इति श्रीमत्कृष्णद्वैपायनकृत ब्रह्मसूत्र भाष्यं श्रीमदानन्दतीर्थ भगवत्पादा चार्य विरचित चतुर्थोध्यायस्य चतुर्थः पादः समाप्तम् ॥

Acc No. 3465 **ब्रह्मसूत्रभाष्यम्**

Beginning :

ॐ ॥

नारायणं गुणैः सर्वैरुदीर्णं दोषवर्जितम् ।
ज्ञेयं गम्यं गुरूंश्चापि नत्वा सूत्रार्थ उच्यते ॥

द्वापरे सर्वत्र ज्ञान आकुलीभूते तन्निर्णयाय ब्रह्मरुद्रेन्द्रादिभिरर्थितो भगवान् नारायणो व्यासत्वेनावततार । अथेष्टानिष्टप्राप्तिपरिहारेच्छूनां तद्योगमविजानतां तज्ज्ञापनार्थं वेदमुत्सन्नं व्यञ्जयंश्चतुर्धा व्यभजत् । चतुर्विंशतिधैकशतधा सहस्रधा द्वादशधा च । तदर्थनिर्णयाय "नारायणाद् विनिष्पन्नं ज्ञानं कृतयुगे स्थितम् । किञ्चित् तदन्यथा जातं त्रेतायां द्वापरेखिलम् । गौतमस्य ऋषेः शापाज्ज्ञाने त्वज्ञानतां गते । सङ्कीर्णबुद्धयो देवा ब्रह्मरुद्रपुरःसराः । शरण्यं शरणं जग्मुर्नारायणमनामयम् । तैर्विज्ञापितकार्यस्तु भगवान् पुरुषोत्तमः ।

Ending :

गुणाद् वालोकवत् यथालोकस्य प्रकाशगुणेन व्याप्तिर्ज्योतीरूपेणाव्याप्तिरेवं चिङ्गुणेन व्याप्तिर्जीवरूपेणाव्याप्तिरिति वा । स्कान्दे च -

"असम्यक् सम्यगिति च ह्यवस्थाभेदतः सुराः । व्याप्त्यव्याप्तियुतास्त्वन्ये चिङ्गुणेनैव नान्यथा । चिङ्गुणस्य स्वरूपत्वात् तद्व्याप्तिश्चेति युज्यते । शक्तियोगात् सुराणां तु विविधा च व्यवस्थितिः" इति ।

"स नित्यो निरवयवः पुण्ययुक् पापयुक् च स इमं लोकममुं चाऽवर्तते स विमुच्यते स एकधा न सप्तधा न दशधा" इति गौपवनश्रुतानेकस्याबहुत्वं प्रतीयते । "स पञ्चधा सप्तधा दशधा भवति शतधा च सहस्रधा ।

Acc No. 3467 ब्रह्मसूत्रभाष्यम्

Beginning :

ॐ ॥

नारायणं गुणैः सर्वैरुदीर्णं दोषवर्जितम् ।
ज्ञेयं गम्यं गुरूंश्चापि नत्वा सूत्रार्थ उच्यते ॥

द्वापरे सर्वत्र ज्ञान आकुलीभूते तन्निर्णयाय ब्रह्मरुद्रेन्द्रादिभिरर्थितो भगवान् नारायणो व्यासत्वेनावततार । अथेष्टानिष्टप्राप्तिपरिहारेच्छूनां तद्योगमविजानतां तज्ज्ञापनार्थं वेदमुत्सन्नं व्यञ्जयंश्चतुर्धा व्यभजत् । चतुर्विंशतिधैकशतधा सहस्रधा द्वादशधा च । तदर्थनिर्णयाय "नारायणाद् विनिष्पन्नं ज्ञानं कृतयुगे स्थितम् । किञ्चित् तदन्यथा जातं त्रेतायां द्वापरेऽखिलम् । गौतमस्य ऋषेः शापाज्ज्ञाने त्वज्ञानतां गते । सङ्कीर्णबुद्धयो देवा ब्रह्मरुद्रपुरःसराः । शरण्यं शरणं जग्मुर्नारायणमनामयम् । तैर्विज्ञापितकार्यस्तु भगवान् पुरुषोत्तमः ।

Ending :

"अध्यायान्ते द्विरुक्तिः स्याद् वेदे वा वैदिकेऽपि वा । विचारो यत्र सज्येत पूर्वोक्तस्यावधारणे । अनुक्तानां प्रमाणानां स्वीकारश्च कृतो भवेत् । विनिन्द्य चेतरान् मार्गान् सम्पूर्णफलता तथा" इति । त्रयोदशमधिकरणम् ।

Colophon :

इति श्रीमदानन्दतीर्थभगवत्पादविरचिते श्रीकृष्णद्वैपायनकृतब्रह्मसूत्रभाष्ये द्वितीयोध्यायः समाप्तम् ।।

Acc No. 3810 **ब्रह्मसूत्रभाष्यम्**

Beginning :

ॐ ।।

नारायणं गुणैः सर्वैरुदीर्णं दोषवर्जितम् ।
ज्ञेयं गम्यं गुरूंश्चापि नत्वा सूत्रार्थ उच्यते ।।

द्वापरे सर्वत्र ज्ञान आकुलीभूते तन्निर्णयाय ब्रह्मरुद्रेन्द्रादिभिरर्थितो भगवान् नारायणो व्यासत्वेनावततार । अथेष्टानिष्टप्राप्तिपरिहारेच्छूनां तद्योगमविजानतां तज्ज्ञापनार्थं वेदमुत्सन्नं व्यञ्जयंश्चतुर्धा व्यभजत् । चतुर्विंशतिधैकशतधा सहस्रधा द्वादशधा च । तदर्थनिर्णयाय ''नारायणाद् विनिष्पन्नं ज्ञानं कृतयुगे स्थितम् । किञ्चित् तदन्यथा जातं त्रेतायां द्वापरेखिलम् । गौतमस्य ऋषेः शापाज्ज्ञाने त्वज्ञानतां गते । सङ्कीर्णबुद्धयो देवा ब्रह्मरुद्रपुरःसराः । शरण्यं शरणं जग्मुर्नारायणमनामयम् । तैर्विज्ञापितकार्यस्तु भगवान् पुरुषोत्तमः ।

Ending :

अनावृत्तिः शब्दादनावृत्तिः शब्दात् ।
ज्ञानानन्दादिभिः सर्वैर्गुणैः पूर्णाय विष्णवे ।
नमोस्तु गुरवे नित्यं सर्वथातिप्रियाय मे ।।

''नच पुनरावर्तते नच पुनरावर्तते'', ''सर्वान् कामानाप्त्वामृतः समभवत् इत्यादिश्रुतिभ्यः ।।

यस्य त्रीण्युदितानि वेदवचने रूपाणि दिव्यान्यलं
बट् तद् दर्शतमित्थमेव निहितं देवस्य भर्गो महत् ।
वायो रामवचोनयं प्रथमकं पृक्षो द्वितीयं वपुर्मध्वो
यत्तु तृतीयकं कृतमिदं भाष्यं तेनहि ।।

Colophon :

इति श्रामदानंदतीर्थ विरचिते चतुर्थोध्यायस्य चतुर्थः पादः समाप्तम् ।।

Acc No. 4680 ब्रह्मसूत्रभाष्यम्

Beginning :

ॐ ॥

नारायणं गुणैः सर्वैरुदीर्णं दोषवर्जितम् ।
ज्ञेयं गम्यं, गुरूंश्चापि नत्वा सूत्रार्थ उच्यते ॥

द्वापरे सर्वत्र ज्ञान आकुलीभूते तन्निर्णयाय ब्रह्मरुद्रेन्द्रादिभिरर्थितो भगवान् नारायणो व्यासत्वेनावततार । अथेष्टानिष्टप्राप्तिपरिहारेच्छूनां तद्योगमविजानतां तज्ज्ञापनार्थं वेदमुत्सन्नं व्यञ्जयंश्चतुर्धा व्यभजत् । चतुर्विंशतिधैकशतधा सहस्रधा द्वादशधा च । तदर्थनिर्णयाय "नारायणाद् विनिष्पन्नं ज्ञानं कृतयुगे स्थितम् । किञ्चित् तदन्यथा जातं त्रेतायां द्वापरेखिलम् । गौतमस्य ऋषेः शापाज्ज्ञाने त्वज्ञानतां गते । सङ्कीर्णबुद्धयो देवा ब्रह्मरुद्रपुरःसराः । शरण्यं शरणं जग्मुर्नारायणमनामयम् । तैर्विज्ञापितकार्यस्तु भगवान् पुरुषोत्तमः ।

Ending :

भोगमात्रमाम्यलिङ्गाञ्च नच भोगविशेषादिविरोधः । "एतमानन्दमयमात्मानमनुविश्य न जायते न म्रियते न ह्रसते न वर्धते यथाकामं चरति यथाकामं पिबति यथाकामं रमते यथाकाममुपरमते" इति भोगमात्रसाम्यलि......

Acc No. 3466 ब्रह्मसूत्रभाष्यटीका तत्वप्रकाशिका

Colophon :

इति श्रामदानंदतीर्थ भगवत्पादाचार्य विरचितस्य श्रीब्रह्मसूत्रभाष्यटीकायां जयतीर्थमुनि कृतायां तत्त्वप्रकाशिकायां प्रथमाध्यायस्य चतुर्थः पादः समाप्तम् ॥

Acc No. 3463 भगवद्गीताभाष्यम्

Beginning :

ॐ ॥

देवं नारायणं नत्वा सर्वदोषविवर्जितम् ।
परिपूर्णं गुरूंश्चान् गीतार्थं वक्ष्यामि लेशतः ॥

नष्टधर्मज्ञानलोककृपालुभिर्ब्रह्मरुद्रेन्द्रादिभिरर्थितो ज्ञानप्रदर्शनाय भगवान् व्यासोवततार । ततश्चेष्टानिष्टप्राप्तिपरिहारसाधनादर्शनात् वेदार्थाज्ञानाच्च संसारेक्लिश्यमानानां वेदानधिकारिणां स्त्रीशूद्रादीनां च धर्मज्ञानद्वारा मोक्षो भवेदिति कृपालुः सर्ववेदाद्यर्थोपबृंहितां तदनुक्तकेवलेश्वरज्ञानदृष्टार्थयुक्तां च सर्वप्राणिनामवगाह्यानवगाह्यरूपां केवलभगवत्स्वरूपपरां परोक्षार्थां महाभारतसंहितामचीक्लृपत् ।

Ending :

ओतं जगद् यत्र स्वयं च पूर्णो वेदोक्तरूपोनुपचारतश्च । सर्वैः शुभैश्चापि युतो नचानन्यैरोंतत्सदित्येनमतो वदन्ति इति ह्यृग्वेदखिलेषु । द्वितीयपादस्तच्छब्दार्थः । सदेव सोम्येदमग्र आसीत् इति च । ओमिति ब्रह्म इति च । तेन ब्रह्मणा । आत्मपूजार्थम् ।

Acc No. 4766 भगवद्गीताभाष्यम्

Beginning :

ॐ ॥

देवं नारायणं नत्वा सर्वदोषविवर्जितम् ।
परिपूर्णं गुरूंश्चान् गीतार्थं वक्ष्यामि लेशतः ॥

नष्टधर्मज्ञानलोककृपालुभिर्ब्रह्मरुद्रेन्द्रादिभिरर्थितो ज्ञानप्रदर्शनाय भगवान् व्यासोवततार । ततश्चेष्टानिष्टप्राप्तिपरिहारसाधनादर्शनात् वेदार्थाज्ञानाच्च संसारे क्लिश्यमानानां वेदानधिकारिणां स्त्रीशूद्रादीनां च धर्मज्ञानद्वारा मोक्षो भवेदिति कृपालुः सर्ववेदाद्यर्थोपबृंहितां तदनुक्तकेवलेश्वरज्ञानदृष्टार्थयुक्तां च सर्वप्राणिनामवगाह्यानवगाह्यरूपां केवलभगवत्स्वरूपपरां परोक्षार्थां महाभारतसंहितामचीक्लृपत् ।

Ending :

धर्मत्यागः फलत्यागः । कथमन्यथा युद्धविधिः यस्तु कर्मफलत्यागी स त्यागीत्यभिधीयते इति चोक्तम् ।

पूर्णादोषमहाविष्णोर्गीतामाश्रित्य लेशतः ।
निरूपणं कृतं तेन प्रीयता मे सदा विभुः ॥

Colophon :

इति श्रीमदानन्दतीर्थ भगवत्पादविरचिते श्रीभगवद्गीताभाष्येष्टादशोध्यायः ।

श्री मदानन्दतीर्थेन्दु वाग्गोगण विजृंभितं ।
जगदज्ञान विमुक्तिं कुमुदेव प्रकाशते ॥

Scribe :

इदं पुस्तकं जिवाजि पन्तरसुत कृष्णपाख हस्त लिखितं प्रमोदनाम संवत्सरे उत्तरायणे शेषातु माघमासे शुक्ल पक्षे एकादशी तिथौ स्थिरवासरे स्वक्षेत्रे पिनाकिनीतीरे......

Acc No. 2834 भागवततात्पर्यटिप्पणी

Beginning :

अस्मिन्नध्याये वैराजाख्यहरेः सकलजगत्सृष्टिप्रपंच्यते तत्रादौ भगवन्तं पुराणं दशलक्षणमित्युक्तम् । तानि दशलक्षणाननि कथयतीत्याह । अत्रेति । अत्र श्रीभागवते सर्गादि लक्षणानि प्रतिपाद्यन्त इति शेषः ।

Ending :

मैत्रेय आख्यायिका कथनमुपसंहरति । एतदिति उक्तार्थेतात्पर्यद्योतनाय एतछ्रवणामात्रेणापि फलं भवतीत्याह । यइदमिति । आत्मयोगगुह्यं परमात्मज्ञानेपायरहस्य । कृतधीः संपादितापरोक्षज्ञानः । सुपर्णकेतौ गरुडध्वजे भगवतिविषये उपलभतेऽप्नोति ।

Colophon :

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां तात्पर्यटिप्पणीयं वेदेशतीर्थपूज्यपादशिष्येण यदुपतिना विरचितायां तृतीयस्कंधे चतुस्त्रिंशोध्यायः ।

Acc No. 2833 भागवतटीका-पदरत्नावली

Ending :

हरिचरितरत्नावलिनिधिः कथंचिद्व्याख्यातो हरिगुरुमहानुग्रह बलात् । महान्तः प्रियन्तां अनुगुण सुलब्धाछतिधियः सहन्तां वा...... मम विवृति मार्गस्कलतः । सुमनः सुमनोर्मोळौ लसतीमुरभिद्गळैः । पदरत्नावली नाम वनमाले विराजतां ।

Colophon :

इति श्रीमन्महेन्द्रतीर्थ पूज्यपादशिष्य विजयध्वजभट्टारक कृतौ श्रीमद्भागवतटीकायां पदरत्नावल्यां चतुर्थ स्कंधे एकविंशोद्यायः ।

Acc No. 3734 भागवतटीका-पदरत्नावली

Beginning :

वरीयान्पृष्टव्योनिगमविषयेयोस्य जनको वराहाद्यात्रायोवतारति । मुरारातिु...... अदाद्धात्रे ज्ञानं सकल विषये...... नुतस्तमंगोपास्वत्वं हृदय सतत स्वेष्टकृतये, संप्रतिपरीक्षित्प्रश्नं परिहरिष्यस्तौति वरीयानिति ।

Ending :

द्वितीयस्कंध...... पदरत्नावलीयया । स्वर्पिताचरणांभोजे पद्मनाभस्यनासतां ।

Colophon :

इति श्रीमहेशतीर्थ पूज्यपादशिष्य विजयध्वजतीर्थयतीन्द्र कृतायां श्रीमद्भागवतटीकायां पदरत्नावल्यां द्वितीयस्कंधे दशमोध्यायः ।

Acc No. 3735 भागवतटीका-पदरत्नावली

Beginning :

नवमस्कंधान्ते संक्षिप्तं श्रीविळचरितं विस्तरतः श्रोतुं राजावृतमन्तधर वक्तुं प्रार्थयते । कथितो वंश विस्तार इत्यादिना ।

Ending :

अवन्तिः सांदीपनिः । अग्रण्यपत्नीभिः रुक्मिण्यादि श्रेष्ट पत्नीभिः सह सन्दीक्षितः । अग्रणीः सर्वोत्तमः ।

Acc No. 3455 भागवतव्याख्या-तात्पर्यनिर्णयः

Beginning :

श्रीरामं हनुमत्सेव्यं मध्वेष्टं बादरायणम् ।
श्रीकृष्णं भीमसेनेष्टं भजेहं बुद्धिशुद्धये ॥
प्रणम्य यादवाचार्यगुरूणां पादपङ्कजे ।
एकादशस्कन्धमूलतात्पर्ये विवृणोम्यहम् ॥

तत्रादौ पूर्वस्कन्धार्थमनुवदति बादरायणिः कृत्वेति । भुवो भारमवतारयन् ।

Ending :

जीवविद्यारिति तथा च केचित्...... दैत्यानाम मोहनार्थाय वेति भावः तथा च कृष्णः यद्यपि अशेष...... ति संभवाप्ययेषु अनन्यहेतुः कुलालस्य......

Acc No. 4769 भाष्यार्थमञ्जरी

Beginning :

तथा दोषवर्मितमित्यनेनापि । इतरेषां सदोषत्वादिति । ज्ञेयमित्यनेनाधिकृतत्वं । व्याख्येयग्रन्थप्रतिपाद्यस्यैवज्ञेयत्वात् । गम्यमित्यनेनेष्टत्वं । अन्यथातत्प्राप्तिसाधनेष्टसाधनताज्ञानाश्रावेनप्रवृत्यनापत्तेरिति । अथ वा । नारायणं महाज्ञेयं विश्वात्मानं परायणमिति श्रुतिंमूलीकृत्य तदर्थपरतया मंगलाचरणमिति ज्ञातव्यं । तथा हि । नारायणमित्यस्य तेनैवानुवादः

Ending :

यः विष्णुः अग्नौतिष्ठन् । य एषः संनिहितः एतस्मिन् अग्नौस्थितः तेजोमयः ज्ञानप्रकाशपूर्णः अमृतमयः आनन्दपूर्णः नित्यप्रधानः मुक्तप्रधानोवापुरुषः पूर्णगुण इत्यादिना वचनेना आमनन्तीति पूर्वेणान्वयः अतः अयं वैश्वानरो विष्णुरेवेतित...... सर्वगतत्वमिति सिद्धं ।

Colophon :

इति श्रीमद्ब्रह्मसूत्रभाष्यर्थमञ्जर्य्यां वेदगर्भकुलीनेन नारायणेन विरिचितायां प्रथमाध्यायस्य द्वितीयः पादः ।

Acc No. 3495 भेदोज्जीवनटिप्पणी

Beginning :

श्रीलक्ष्मीनृसिंहायनमः ।। हरिः ॐ ।।

निर्विघ्नमस्तु । रामंरमापतिंनत्वाश्रीमध्वंजययोमिनंव्यसतीर्थगुरुन्वेदोज्जीवनं व्याकरोम्यहं । इहखलु सुखमेस्याद्दुखं मनागपि माभूदिति निखिलापेक्षितमोक्षस्य पञ्चभेदीश्च विज्ञाय विज्ञाय विष्णोः स्वा भेदमेव च निर्दोषत्वं गुणोद्रेकं ज्ञात्वामुक्तिर्नचात्यथा ।। इति पञ्च भेदज्ञानसाद्यत्व स्मरणात्तदर्थं प्रवृत्तमपिचिरन्तनशास्त्रं अतिगंभीरतया मन्दानां भेदज्ञानाजनकमिति तदुक्त भेदप्रमाणान्येव संग्रहय संक्षिप्यच भेदोज्जीवनाख्य प्रकरण निर्माणेन भेदज्ञानं जनयित्वा मन्दानुद्दधीर्षुः व्यासतीर्थमुनिः

प्रारीप्सित परिसमाप्त्यादि फलक शिष्टाचार प्रमाणकेष्टदेवता स्तवन प्रार्थनारूपं मंगलं कृत्वा शिष्यानुग्राहयितुं ग्रन्थादावुपनिबध्नाति । स्वभावता इति ।

Ending :

घटपटयोरभेदंवदतापटेपि घटत्वस्यांगीकारेण पटेपि घटत्वात्यंताभावस्य प्रतियोगि समानाधिकरणत्वादितिचेल । त्वयापि घटपटयोरभेदंवदतापटेघट......

Acc No. 3494 भेदोज्जीवनटीका

Beginning :

श्रीगुरुभ्योनमः । हरिः ॐ ।

जन्माद्यस्य यतशास्त्रगम्यमन्वयतः पृथुक् ।
परमं ब्रह्मविष्णवाख्यमधिकम् तदुपास्महे ॥

अखिलापेक्षितमोक्षप्रयोजक परदेवतोत्कर्ष प्रतिपत्ति प्रतिबंधिका भेदविप्रतिपत्तिनिषेधपूर्वक भेदव्यवस्यापनाय प्रकरणमारभमाणो व्यासतीर्थमुनिर्निरतरायपरिसमाप्तये प्रचयायचपरमेश्वर प्रार्थयते । स्वभावत इति । यद्यपि भगवप्तादैरेवसपरिष्करभेदो व्यवस्पितः ।

Ending :

तन्ननोक्तदोष इत्याशङ्कते । नन्विति जीवाभावोपलक्षित चैत्यस्यैवपक्षत्वा अर्थान्तरादित्याशयेन समाधत्ते । तन्नेति । सतोष्टव्यमित्यनेनाभ्युपेत्यवेदमुक्तं । वस्तुतौविशिष्टस्या सत्वमेघसूचितं । तदेवेति । दुःखानुसं......

Acc No. 2835 भेदसञ्जीविनी

Beginning :

दृष्टान्ताभावस्थिर एवेतिस्थाशयेन तस्यैव दृढतया कथनमितिनकोपिदोषः । नचैवमनुमानंशङ्ककस्यसाध्यप्रसित्धावपि स्वरीत्याभ्रमसंभवेन यथाश्रुत साध्यनिर्देश सम्भवातत्र भवदुक्त साध्यापरिष्कारोकिंचित्कर इति वाच्यं ।

Ending :

बिंबप्रतिबंबस्थानीयमस्यैवोक्तत्वेन प्रतिबिंबत्वानु...... संगतिः । ......घटाकाशे तत्परिमाणप्रतितिजनकत्वं वर्तत एव । महाकाशेनतदापादकत्वं...... नास्त्येव । आलोकस्य दर्पणे......

Acc No. 3804 **मध्वविजयम्**

Beginning :

कान्ताय कल्याणगुणैकधाम्ने नवद्युनाथप्रतिमप्रभाय ।
नारायणायाखिलकारणाय श्रीप्राणनाथाय नमस्करोमि ।। १ ।।

Ending :

अम्नायास्त्रय इव तत्त्वबोधकास्ते पापघ्नास्त्रय इव पावकाः प्रजानाम् ।
लोका वा सकलभृतस्त्रयोत्र रेजुः सानन्दा मुनिसुतधर्मसूनुमध्वाः ।। ५४ ।।

Colophon :

इति श्रीमदानन्दतीर्थ भगवत्पादचार्यशिष्य नारायणपंडितचार्य कृतौ श्रीमध्वविजये महाकाव्ये अष्टम् सर्गः ।

Acc No. 2809 **महाभारततात्पर्यनिर्णयः**

Beginning :

नारायणाय परिपूर्ण गुणार्णवाय विश्वोदयस्थितिलयोन्नियति प्रदया ।
ज्ञान प्रदाय विबुधासुरसौख्यदुःखसत्कारणायवितताय नमोनमस्ते ।।

Ending :

अयात्रिपुत्रौ च स - जाबुवन्तौ प्रजभ्रतुः शैल वन्दे त्रिलिस्तं । गिरीन्विदार्याशुशरैरथान्या ।

Colophon :

इति श्रीमदानन्दतीर्थ भगवत्पादाचार्य विरचिते श्रीमन्माहाभारततात्पर्य निर्णये सप्तमोध्यायः ।

Acc No. 2821 **महाभारततात्पर्यनिर्णयः**

Beginning :

नारायणाय परिपूर्णगुणार्णवाय विश्वोदयस्थितिलयोन्नियतिप्रदया ।
ज्ञानप्रदाय विबुधासुरसौख्यदुःखसत्कारणाय वितताय नमोनमस्ते ।।

आसीदुदारगुणवारिधिरप्रमेयो नारायणः परतमः परमात् स एकः ।
संशान्तसंविदखिलं जठरे निधाय लक्ष्मीभुजान्तरगतः स्वरतोपि चाग्रे ॥

Ending :

इत्यादिकल्पोत्थित एष सर्गो मया समस्तागमनिर्णयात्मकः ।
सहानुसर्गः कथितोत्र पूर्वो योयो गुणैर्नित्यमसौ वरो हि ॥
पाश्चात्यकल्पेष्वपि सर्गभेदाः श्रुतौ पुराणेष्वपिचान्यथोक्ताः ।
नोत्कर्षहेतुः प्रथमत्वमेषु विशेषवाक्यैरवगम्यमेतत् ॥

Colophon :

इति श्रीमदानन्दतीर्थ भगवत्पादाचार्य विरचितै श्रीमन्माहाभारततात्पर्यनिर्णये सर्गानुसर्गप्रळय प्रार्दुभावनिर्णयोनाम तृतीयोध्यायः ।

Acc No. 2863 महाभारततात्पर्यनिर्णयः

Beginning :

नारायणाय परिपूर्णगुणार्णवाय विश्वोदयस्थितिलयोन्नियतिप्रदाव्या ।
ज्ञानप्रदाय विबुधासुरसौख्यदुःखसत्कारणाय वितताय नमोनमस्ते ॥
आसीदुदारगुणवारिधिरप्रमेयो नारायणः परतमः परमात् स एकः ।
संशान्तसंविदखिलं जठरे निधाय लक्ष्मीभुजान्तरगतः स्वरतोपि चाग्रे ॥

Ending :

तस्मादयं ग्रन्थवरोखिलोरुधर्मादिमोक्षान्तपुमर्थहेतुः ।
किं वोदितैरस्य गुणैस्ततोन्यै र्नारायणः प्रीतिमुपैत्यतोलम् ॥
यः सर्वगुणसम्पूर्णः सर्वदोषविवर्जितः ।
प्रीयतां प्रीत एवालं विष्णुर्मे परमः सुहृत् ॥

Colophon :

इति श्रीमदानन्दतीर्थ भगवत्पादविरचिते श्रीमहाभारततात्पर्यनिर्णये पाण्डवस्वर्गारोहणं नाम द्वात्रिंशोध्यायः ।

Acc No. 3457 **महाभारततात्पर्यनिर्णयः**

Beginning :

स एष भोजेषु पुनश्च जातो वरादुमेशस्य परैरजेयः ।
स औग्रसेने जनितोसुरेण क्षेत्रे हि तद्रूपधरेण मायया ॥
गन्धर्वविजेन द्रमिळेन नाम्ना कंसोजितो येन वराच्छचीपतिः ।
जित्वा जलेशं च हृतानि येन रत्नानि यक्षाश्च जिताः शिवस्य ॥

Ending :

ततस्ते जाह्नवीतीरे वने वटमुपाश्रिताः ।
न्यषीदन्नागतान् दृष्ट्वा समस्तान् पुरवासिनः ॥
ततस्तु ते सर्वजगन्निवासं नारायणं नित्यसमस्तसद्गुणम् ।
स्वयम्भुशर्वादिभिरर्चितं सदा भक्तयास्मरन् भक्तभवापहं प्रभुम् ॥

Colophon :

इति श्रीमदानन्दतीर्थ भगवत्पादविरचिते श्रीमहाभारततात्पर्यनिर्णये एकविंशोध्यायः ।

Acc No. 3689 **महाभारततात्पर्यनिर्णयः**

Beginning :

ॐ ॥

शशाङ्कपुत्रादभवत् पुरूरवास्तस्यायुरायोर्नहुषो ययाति ।
तस्यास पत्नीयुगळं सुताश्च पञ्चाभवन् विष्णुपदैकभक्ताः ॥
यदुं च तुर्वशुं चैव देवयानी व्यजायत ।
द्रुह्युं चानुं तथा पूरुं शर्मिष्ठा वार्षपर्वणी ॥

Ending :

द्रोणात्मकं नातितरां स्वसेवकं कुर्याद्धरिर्मामिति भूय एव ।
स उद्धवात्मावततार यादवेष्वासेवनार्थं पुरुषोत्तमस्य ॥
बृहस्पतेरेव स सर्वविद्या अवाप मन्त्री निपुणः सर्ववेत्ता ।

Acc No. 3831 **महाभारततात्पर्यनिर्णयः**

Beginning :

नारायणाय परिपूर्णगुणार्णवाय विश्वोदयस्थितिलयोन्नियतिप्रदव्या ।
ज्ञानप्रदाय विबुधासुरसौख्यदुःखसत्कारणाय वितताय नमोनमस्ते ॥
आसीदुदारगुणवारिधिरप्रमेयो नारायणः परतमः परमात् स एकः ।
संशान्तसंविदखिलं जठरे निधाय लक्ष्मीभुजान्तरगतः स्वरतोपि चाग्रे ॥

Ending :

इत्यादिकल्पोत्थित एष सर्गो मया समस्तागमनिर्णयात्मकः ।
सहानुसर्गः कथितोत्र पूर्वो योयो गुणैर्नित्यमसौ वरो हि ॥
पाश्चात्यकल्पेष्वपि सर्गभेदाः श्रुतौ पुराणेष्वपिचान्यथोक्ताः ।
नोत्कर्षहेतुः प्रथमत्वमेषु विशेषवाक्यैरवगम्यमेतत् ॥

Colophon :

इति श्रीमदानन्दतीर्थ भगवत्पादाचार्य विरचितै श्रीमन्माहाभारततात्पर्य निर्णये सर्गनुसर्गप्रळय प्रार्दुभावनिर्णयोनाम तृतीयोध्यायः ।

Acc No. 2825 **महाभारततात्पर्यनिर्णयटीका पदार्थदीपिका**

Beginning :

नारायणं पूर्णगुर्णेकदेहं जन्मादिदं ज्ञानविबन्धहेतुम् ।
विश्वस्य मुक्तितरसारद्यदुःख सन्देतुमीशं विततं नमामि ॥
नमामि नीलांबुदकान्तिकांतं व्यासं ननिरस्ताखिल दोषपुंजं ।
ज्ञानादिदं ब्रह्मशिवादिकेभ्यः सत कौमुदास्ययुक्तहस्तं ॥
जयति श्रीमदानन्दतीर्थ मार्ताण्डचन्डगौ ।
यत्संपूर्ण सता मोहशार्वरी समतीदलात् ॥
गुरून्नत्वा भारतार्थनिर्णियस्य प्रदीपिका ।
व्यासतीर्थादि सहवाख्यामाश्रित्यक्रियतेमया ॥

Ending :

सर्वैलोकेदेवेश्वयद्वासर्वेदिविवमुक्ता मुक्तेर्मुख्यतयं वन्द्य इति ।

Colophon :

इति श्रीमदानन्दतीर्थ भगत्पाद विरचितस्य श्रीमन्महभारततात्पर्यनिर्णयस्यटीकायां जनार्दनभट्ट विरचितायां पदार्थोद्दीपिकायां प्रथमोध्यायः ।

Acc No. 3459 महाभारततात्पर्यनिर्णयटीका पदार्थदीपिका

Beginning :

एको विष्णुरेवपरमः सर्वोत्कृष्ठः । तस्य विष्णोर्ज्ञानमेवमीक्षसाधनं नास्त्राणाम निर्णयस्तदन्यदेतद्वियुक्तं यन्मयोच्यते तन्मोहनाय हि यस्मातस्मादेव निर्णयति संबन्धः तदन्य मोहनाय हीत्युक्तम् विवरणोति ज्ञानम् विनेत्यदिना ज्ञानविन । कर्ममात्रेण मुक्तिरिति परित्यर्थः ।

Ending :

करिष्यामि । कथम् भूतम् मोहो योमोहो जनानुदुर्जनानु मोहइष्यति । भ्रान्तानुकरिष्यति । हेमहाबाहो रुद्रत्वंच मोहशास्त्राणि मोहजनक शास्त्रा......

Acc No. 3773 महाभारततात्पर्यनिर्णयटीका पदार्थदीपिका

Beginning :

तेनकीचकहननवार्ता श्रवणेनद्रौपदीकारणेन भीमसेन हतं अवदत् । दुर्योधनाद्यास्तत्रमतस्यदेशं प्रतिअगुः । तत्र तेषुमध्येसुशर्मा अयेपुरतः येगेसुशर्मा विराठस्ययोः त्वा गवपहारमिति शेषः । यदा जगृहेतदातंसुशर्माणं अयात्राय । सभीमः मात्स्यं विराटं । तं सुशर्माणं ततः सुशर्ममोचनानं तरते पाण्डवाः बाह्यतः पुराद्वहियुद्दस्थाने इत्यर्थः । तदुक्तं विराटे । अभिमुच्यसुशर्माणं पाण्डवास्तेदूतद्विषः ।

Ending :

श्रुत्वाभक्त्यादिमांशास्त्रंहरिभक्तिविवृद्दये । महाभारततात्पर्यदीपिकामकरोत्सुधीः । निर्दोषसुखचिच्छक्तिः. सर्वसद्गुण विग्रहः । प्रीयतामनयामध्वहृदि संस्थोरमापतिः । यंगंगाजमदग्निजान्वयभवाद्विद्वत्धिरण्.।भिधात्पुत्रं

प्राप्यजनार्दनाभिधमतिख्यातासतां संसदि । द्वात्रिंशोस्यकृतः सतीसुखकरोध्यायः समाप्तिः शुभाश्रीमद्भारतभावनिर्णयपदार्थोद्दीपिकायामगात् ।

Colophon :

इति श्रीमदानन्दतीर्थ भगवत्पादचार्य विरचिते श्रीमन्महभारततात्पर्यनिर्णयस्य जनार्दनभट्ट विरचितायां पदार्थदीपिकायां प्रथमोध्यायः ।

Acc No. 3771 महाभारततात्पर्यनिर्णयटीका

Beginning :

यस्मादेवंदेवानां परमोधर्मस्तस्माद्भीमोहनूमांश्च एक एवतथापि अत्रस्थळेज्यायः कनीयोवृत्तिं उच्चनीचवृत्तिमभिपेदे प्राप्तवान् हनूमानुवृत्तिंभीमोनीचवृत्तिमभिपेद इत्यर्थः । वायोरसाधारण्यं वृत्ति वक्तुं सर्वेदेवेषुतावदाह । सर्वे इति । सुराणांदेवानांमाननुषत्वेसति सर्वेगुणाः ज्ञानशक्त्याद्या अवृत्ताः भवन्ति । कस्माद्युगानुसारात् । कृतेकिंचिदावृत्ताः त्रेतायान्ततेधिकमावृत्ता इत्यादिक्रमेणमूरूपमपेक्ष्यावृत्ताः अनभिव्यक्ताभवन्तित्यर्थः ।

Ending :

तंच सुशर्माणं बाह्यतः । पुरतः बाह्यप्रदेशरात्रौन्यवसन् ततस्तदेपेक्षया । अपरदिनेकीचकैरहितं मात्स्यं विराटं शक्तं नत्वा एतदेवविवृणोति । कीचकस्येति । भीष्माद्या अपि कीचकादीना बाधनाय कथंचनकेनापि प्रकारेणन सेकुर्यस्मात्तस्मातेभीष्माद्याः कीचकं शान्तहतं श्रुत्वायुधेयुद्दार्थंमात्स्यं ययुः तान् धार्तराष्ट्रान् रक्षितुं यतिष्ये । शक्तितः प्रयत्नंकरिष्यामीति स्वकां प्रतिज्ञां सत्याकर्तु सपुत्रकः साश्वत्थामा ।

Acc No. 3772 महाभारततात्पर्यनिर्णयटीका

Beginning :

श्रीवेदव्यासायनमः ।

तृतीयाध्यायेभौमीतनुर्मरुत आहकथाः परस्येत्यनेनभगवदवतार कथाःप्रतिज्ञवराहाद्यवतार कथाःसंक्षेपेणोक्ताभारतंचाशेषतत्वनिर्णयार्थं श्रीरामकृष्णावतारद्वयपुरस्कारेण प्रवृत्तमित्युक्तं । अत एव तत्र । मार्कांडेयाख्याने रामकथा विस्तरेणोक्ता । पस्वात्तनत्वात्कृष्णस्यवैशेष्यात्तत्वनिर्णय इत्युक्तरीत्या रामावतारकथाया विशेषतो निर्णयहेतुत्वादिति विस्तरेण कृष्णकथोक्ताभारते ।

तत्तात्पर्यनिर्णयकर्ता भगवानाचार्योपि तदनुसारेणैव प्रवर्तमानः। शशांकपुत्रादित्यादिना कृष्णावतार कथामतिविस्तरेणवक्ष्यन्रामावतार कथां विस्तरेण वक्तुं प्रारंभते ।

Ending :

धर्म इत्यादिनामानुषे प्राप्तेसतिस्वीयेपि रूपे अन्यवदेव वृत्तिर्वर्त्तनं देवानां परमोधर्मः दिव्यशक्तेः स्वमूलरूपे विद्यमानया देवताशक्तेर्विशेषादनादानं अस्वीकारस्तथानरस्वभावेमानुषस्य भावे एव सर्वदावृत्तिश्चपरमोधर्मः ।

Acc No. 3774 महाभारततात्पर्यनिर्णयटीका

Beginning :

श्रीवेदव्यासायनमः ।

आनन्दतीर्थहृत्पद्मकर्णिकावासमच्युतं ।
नत्वाभारततात्पर्यनिर्णयं विवृणोम्यहं ॥

अथमत्वाभारततात्पर्यनिर्णयव्याजेनसकलशास्त्रार्थतात्पर्यं दर्शायितुकामो भगवानाचार्यः स्वयमन्तराय विधुरोपि निरन्तराय प्रारीप्सितपरिसमाप्त्यादि हेतुभूतमिष्टदेवतानति रूपं मंगलं शिष्यान्ग्राहयितुं अनुष्ठितग्रन्थादौ निबध्नाति । नारायणायेति । नारायणाय ते नमो नमः इति संबन्धः ग्रन्थारंभसमयेप्य-परोक्षीकृतभगवरूपत्वात्ते इत्यपरोक्षेणनिर्देशः । भक्त्यातिशयद्योतनाय नमो नमः इति द्विरुक्तिः ।

Ending :

महाविशेषेति । एतदुत्कर्षज्ञापकं प्रथमं विशेषवाक्यैरवगम्यमवगंतव्यमित्यर्थः । सर्गभिदप्रतिपादक...... पकं नत्ववान्तरसर्गे प्रथम्यमिति विशेषोज्ञातव्य इति भाव इत्यशेषमतिमंगलमिति...... व्याकृतस्तावत्प्रीत्यैमाधवमध्वयोः ।

Colophon :

इति श्रीमन्महाभारततात्पर्यनिर्णयटीकायां वरदराजाय तृतीयोध्यायः ।

Acc No. 3730B माण्डूक्योपनिषद्खण्डार्थः

Beginning :

श्रीवेदव्यासायनमः ।

समस्तगुणपूर्णायदोषदूरायविष्णवे ।
नमःश्रीप्राणनाथायभक्ताभीष्टप्रदायिने ॥

अस्या उपनिषदोमंडूकरूपीवरुणऋषिः विश्वादिचतुरूपीहरिर्देवता केषांचिदोबधानां अक्षरगणनरूपानुष्टपच्छन्दस्त्वं ज्ञेयं। मुमुक्षोरधिकारिण अखिलक्लेश निवृत्तिविशिष्टपरमानन्दावाप्तये समस्तव्यस्तप्रणवप्रतिपाद्य भगवदुपासनां वक्तुं प्रवृत्तेयमुपनिषत्। आदौसमस्तप्रणवप्रतिपाद्यं तावदाह। ओमित्यादिनायमात्माब्रह्मेत्यन्तेन एतदिति श्रवणाद्यदित्यन्वेति। ओमित्युक्तमितिशेषः।

Ending :

एवमुक्तां समस्तव्यस्त प्रणवाभिधेय भगवदुपासनामनुवदनुत ज्ञानिनःस्तवेनोपसंहरति। अमात्र इति। अमात्रःभिन्नांशहीनः अनन्तमात्रः विश्वाद्यनंताशः द्वैतस्योपशमः सर्वानिष्टनिवर्तकः शिवःर्निदुखसुखरूप ओंकार ओमित्याक्रियमाणः येनविदितोज्ञातः समुनिः मननशीलः नेतर इति द्विरुक्तिः उक्तसर्वत्रप्रमेयावधारणार्था। इति चतुर्थखंडार्थः।

ॐ प्रणवप्रतिपाद्याय चतुर्मुर्त्तिस्वरूपिणे।
नमः श्रीप्राणनाथाय भक्ताभीष्टप्रदायिने।

Colophon :

इति श्रीमाण्डूक्योपनिषदर्थानां संग्रहोत्र राघवेंद्रकृतस्तेन प्रीयतांकमलापतिः। इति श्रीमाण्डूक्योपनिषत्खंडार्थः समाप्तः।

Acc No. 4802 माण्डूक्योपनिषद्खण्डार्थः

Beginning :

किं तेषां...... कानिनामानीत्यतस्तत्सर्वंक्तमेणाह। जागरितेति। यत्रस्थित्वा जागर्तितच्चक्षुर्जागरितं अधिकरणोक्त प्रत्ययः। तदेवस्थानं यस्यसजागरितस्थानः चक्षुस्थान इत्यर्थः। बहिः प्रज्ञः।

Ending :

दिशाद्दिमत्वसामान्यं आदिमत्वेन विश्वसामान्यं भवति। तं यथायथोपासते तदेव भवतीत्यादेरिति भावः। मात्रासंप्रतिपत्तौ आत्मनों......

Acc No. 4792 माण्डूक्योपनिषद्भाष्यम्

Beginning :

पूर्णानन्दज्ञानशक्तिस्वरूपं नित्यमव्ययम्।
चतुर्धा सर्वभोक्तारं वन्दे विष्णुं परं पदम्॥
माण्डूकरूपिणा वरुणेन चतूरूपो नारायणः स्तूयते।

ध्यायन्नारायणं देवं प्रणवेन समाहितः । मण्डूकरूपी वरुणस्तुष्टाव हरिमव्ययम् इति पाद्मे । ओमित्युक्तं तु यद् ब्रह्म तदक्षरमुदाहृतम् । ओतमत्र जगद् यस्मादों तस्माद् भगवान् हरिः । तदिदं गुणपूर्त्यैव सर्वमित्येव शब्दितम् । भाविभूतभवत्कालेष्वेकरूपतया हरिः । सर्वदा नित्य इत्येषा व्याख्योङ्कारस्य कीर्तिता इति बृहत्संहितायाम् । ओमित्याक्रियते यस्मादोङ्कारोसावतः परः । सर्वत्वमिति पूर्णत्वं तन्नान्यस्य हरेः क्वचित् इति नैर्गुण्ये ।

Ending :

ओमित्याक्रियमाणत्वादोङ्कारः स प्रकीर्तितः । आदिमत्त्वादयो ह्यर्था ओमित्यस्य श्रुतौ श्रुताः । अपूर्वः कारणाभावान्नाशाभावादनन्तरः । पराधीनस्थित्यभावादनपर उदाहृतः । सर्वगत्वादबाह्यश्च तं ज्ञात्वा विप्रमुच्यते इति च । परत्वमपरत्वं च विष्णोरेकस्य वै यदा । श्रूयते नतु सामर्थ्यभेदस्तत्र कथञ्चन । अवतारस्य पूर्वत्वात् पौर्वापर्यमुदाहृतम् इति ब्रह्मतर्के । पूर्वावतारे पश्चिमावतारेपि पूर्ण एवेति प्रणवो ह्यपरं ब्रह्मेत्यादेरर्थः ।

एकोपि निर्विशेषोपि चतुर्धा व्यवहारभाक् ।
यस्तं वन्दे सदानन्दं विष्णुं विश्वादिरूपिणम् ॥

Colophon :

इति श्रीमदानन्दतीर्थभगवत्पादविरचितं माण्डूक्योपनिषद्भाष्यं समाप्तम् ।

Acc No. 4799 **माण्डूक्योपनिषद्भाष्यम्**

Beginning :

पूर्णानन्दज्ञानशक्तिस्वरूपं नित्यमव्ययम् ।
चतुर्धा सर्वभोक्तारं वन्दे विष्णुं परं पदम् ॥
माण्डूकरूपिणा वरुणेन चतूरूपो नारायणः स्तूयते ।

ध्यायन्नारायणं देवं प्रणवेन समाहितः । मण्डूकरूपी वरुणस्तुष्टाव हरिमव्ययम् इति पाद्मे । ओमित्युक्तं तु यद् ब्रह्म तदक्षरमुदाहृतम् । ओतमत्र जगद् यस्मादों तस्माद् भगवान् हरिः । तदिदं गुणपूर्त्यैव सर्वमित्येव शब्दितम् । भाविभूतभवत्कालेष्वेकरूपतया हरिः । सर्वदा नित्य इत्येषा व्याख्योङ्कारस्य कीर्तिता इति बृहत्संहितायाम् । ओमित्याक्रियते यस्मादोङ्कारोसावतः परः । सर्वत्वमिति पूर्णत्वं तन्नान्यस्य हरेः क्वचित् इति नैर्गुण्ये ।

Ending :

ओमित्याक्रियमाणत्वादोङ्कारः स प्रकीर्तितः । आदिमत्त्वादयो ह्यर्था ओमित्यस्य श्रुतौ श्रुताः । अपूर्वः कारणाभावान्नाशाभावादनन्तरः । पराधीनस्थित्यभावादनपर उदाहृतः । सर्वगत्वादबाह्यश्च

तं ज्ञात्वा विप्रमुच्यते इति च । परत्वमपरत्वं च विष्णोरेकस्य वै यदा । श्रूयते नतु सामर्थ्यभेदस्तत्र कथञ्चन । अवतारस्य पूर्वत्वात् पौर्वापर्यमुदाहृतम् इति ब्रह्मतर्के । पूर्वावतारे पश्चिमावतारेपि पूर्ण एवेति प्रणवो ह्यपरं ब्रह्मेत्यादेरर्थः ।

एकोपि निर्विशेषोपि चतुर्धा व्यवहारभाक् ।
यस्तं वन्दे सदानन्दं विष्णुं विश्वादिरूपिणम् ।।

Colophon :

इति श्रीमदानन्दतीर्थभगवत्पादविरचितं माण्डूक्योपनिषद्भाष्यं समाप्तम् ।

Acc No. 4796 माण्डूक्योपनिषद्भाष्यविवरणम्

Beginning :

श्रीविश्वादि चतुमूर्तयेनमः । हरिः ॐ ।

नेत्राग्रादिस्थितोवस्थाः जाग्रदाधाः प्रवर्तयन् । विश्वादिरूपीभगवान् यस्तं वन्दे श्रियः पतिं । इहामुत्रभोगविरक्तस्यशमदमादि मतोमुमुक्षोरधिकारिणोनिष्टनिष्टत्ति इष्टप्राप्तिसाधन भगवत्प्रतिपादिकां माण्डूकोपनिषदं यथा तध्वाचिख्यासुः भगवानानन्दतीर्थोमुनिः समीहित समाप्त्यादि साधन तयावसितं मंगलाचरणदौमाकार्यमिनिज्ञापयन् तदुक्त गुणवन्तमुपश्लोकयन् प्रणमति । पूर्णेति । आनन्दमय इति पूर्णानन्दत्वमुक्तं ।

Ending :

